त्रिगणः, पुं, (त्रयाणां धर्म्मार्थकामानां गणो वर्गः ।) त्रिवर्गः । धर्म्मार्थकामाः । इत्यमरटीकायां नीलकण्ठः ॥ (यथा, किरातार्ज्जुनीये । १ । ११ ।
"गुणानुरागादिव सख्यमीयिवा-
न वाधतेऽस्य त्रिगणः परस्परम् ॥")

त्रिगर्त्तः, पुं, (त्रयो गर्त्ता यत्र ।) देशविशेषः । लाहोराख्यदेशैकभागः । तत्पर्य्यायः । जालन्धरः २ । इति हेमचन्द्रः । ४ । २४ ॥ (देशोऽयं कूर्म्मविभागे उत्तरस्यासक्तः । यथा, वृहत्संहितायाम् । १४ । २५ ।
"उत्तरतः कैलासः" इत्युपक्रम्य,—
"त्रिगर्त्ततुरगाननाश्वमुखाः ॥"
इत्युक्तवान् ॥)
तद्देशस्थे पुं भूम्नि । (यथा, महाभारते । २ । २७ । १८ ।
"ततस्त्रिगर्त्ताः कौन्तेयं दार्व्वाः कोकनदास्तथा ।
क्षत्रिया बहवो राजन्नुपावर्त्तन्त सर्व्वशः ॥")
गणितान्तरम् । इति मेदिनी । ते, ११३ ॥

त्रिगर्त्तकः, पुं, (त्रिगर्त्त एव । स्वार्थे कन् ।) त्रिगर्त्तदेशः । इति त्रिकाण्डशेषः ॥

त्रिगर्त्ता, स्त्री, (त्रयो गर्त्ता यस्याः ।) घुर्घुरिका । (त्रयो बहवो गर्त्ता इव योनिद्वाराणि यस्याः ।) कामुकाङ्गना । इति मेदिनी । ते, ११३ ॥

त्रिगर्त्तिकः, पुं, (त्रयो गर्त्ताः सन्ति यत्र । त्रिगर्त्त + बहुलवचनात् ठन् ।) त्रिगर्त्तदेशः । इति भूरिप्रयोगः ॥

त्रिगुणं, क्ली, (त्रयाणां सत्त्वरजस्तमसां गुणानां समाहारः ।) सत्त्वरजस्तमांसि । इति श्रीभागवतम् ॥ (प्रधानः । यथा, भागवते ।४।२४।२८।
"यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् ।"
"रंहसः सूक्ष्मात् त्रिगुणात् प्रधानात् जीवसंज्ञितात् पुरुषाच्च परम् ॥" इति तट्टीकायां स्वामी ॥) त्रयाणां पूरणे गुणत्रययुक्ते च त्रि ॥ (यथा, मनुः । १ । १५ ।
"महान्तमेव चात्मानं सर्व्वाणि त्रिगुणानि च ।
विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च ॥"
त्रयो गुणा आवृत्तयो यस्य । त्रिभिर्गुणितै । यथा, रघुः । २ । २५ ।
"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")

त्रिगुणा, स्त्री, (त्रयो गुणा यस्याः ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"पदैस्त्रिभिर्व्वलिर्बद्धो रागादित्रिपदाथ वा ।
उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता ॥"
(तथाच देवीभागवते । १२ । ६ । ६५ ।
"त्रिगुणा त्रिपदा तन्त्रीस्तुलसी तरुणातरुः ॥"
स्वनामख्यातो बीजभेदः । इति तन्त्रसारः ॥)

त्रिगुणाकृतं, त्रि, (त्रिगुणं कर्षणं कृतम् । त्रिगुण + कृतम् । "संख्यायाश्च गुणान्तायाः ।" ५ । ४ । ५९ । इति डाच् ।) वारत्रयकृष्टक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥

त्रिजटा, स्त्री, (तिस्रो जटा यस्याः ।) राक्षसीविशेषः । यथा,—
"सीतां ताभिरनार्य्याभिर्दृष्ट्वा सन्तर्ज्जितां तदा ।
राक्षसी त्रिजटा वृद्धा प्रबुद्धा वाक्यमब्रवीत् ॥"
इति रामायणे सुन्दरकाण्डे २७ अध्यायः ॥ *॥
बिल्ववृक्षः । यथा, ज्ञानभैरवतन्त्रे ६ पटोले ।
"शृणु देवि ! प्रवक्ष्यामि रहस्यं त्रिजटोत्तमम् ।
पत्रं ब्रह्ममयं देवि ! चाद्भुतं वरवर्णिनि ! ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा ॥
ब्रह्मविष्णुशिवाः पत्रे वृन्तञ्च शक्तिरूपिणी ।
वृन्तमूले तु वच्चं स्यात् पत्रं ब्रह्म त्विदं प्रिये ! ॥
एकञ्च त्रिजटापत्रैर्हरं वा हरिमर्च्चयेत् ।
कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः ॥"
अन्यत् बिल्वशब्दे द्रष्टव्यम् ॥ (भगवती । सा च गायत्त्रीस्वरूपा । यथा, देवीभागवते ।१२।६।७२।
"त्रिजटा तित्तिरी तृष्णा त्रिविधा तरुणाकृतिः॥")

त्रिजातकं, क्ली, (त्रिगुणितं जातं सुगन्धिद्रव्यरूपम् । ततः स्वार्थे कन् ।) मिलिततुल्यत्वगेलापत्राणि । यथा,—
"एलादित्रिभिरुद्दिष्टं त्रिजातं त्रिसुगन्धिकम् ।
चातुर्जातं सनागन्तु इयं वातकफापहम् ॥"
अपि च ।
"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् ।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते ॥"
इति राजनिर्घण्टः ॥
(अस्य लक्षणपर्य्याया यथा,—
"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् ।
तद्वयं रेचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् ।
लघुपित्ताग्निकृद्बल्यं कफवातविषापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

त्रिणं, क्ली, (तृण + पृषोदरादित्वात् साधुः ।) तृणम् । इति शब्दरत्नावली ॥ (यथा, तृणशब्दव्युत्पत्तौ उज्ज्वलदत्तः । ५ । ८ ।
"रेफेकारसंयुक्तमप्युत्पन्नं शब्दान्तरमस्ति ।
'उत्क्षिप्तत्रिणपत्रपांशुविहगः सौम्यस्वनः पूजितः ।'
इति वराहः ॥")

त्रिणता, स्त्री, (त्रिषु स्थानेषु नता । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) धनुः । इति त्रिकाण्डशेषः ॥ (यथा, माघे । १९ । ६१ ।
"सगुणैराप्तफलप्राप्तैराकृष्य गणिका इव ।
कामुका इव नालीकांस्त्रिणताः सहसामुचन् ॥"
त्रिणस्य भावः । त्रिण + तल् ।) त्रिणत्वञ्च । (त्रिषु स्थानेषु नते, त्रि । यथा, रामायणे । ६ । २० । २८ ।
"भिन्नमुष्टिपरिध्वस्तं त्रिणतं रुक्मरञ्जितम् ।
बाणपातान्तरे रामः पतितं पुरुषर्षभम् ।
शयानं लक्ष्मणं दृष्ट्वा निराशो जीवितेऽभवत् ॥")

त्रिणाचिकेतः, पुं, (त्रिःकृत्वश्चितो नाचिकेतोऽग्निर्येन । पूर्व्वपदादिति णत्वम् ।) यजुर्व्वेदैकदेशो ग्रन्थः । तद्वेदाध्यायी । (यथा, मनुः । ३ । १८५ ।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥"
"त्रिणाचिकेतः अध्वर्य्युवेदभागस्तद्व्रतञ्च तद्योगात् पुरुषोऽपि त्रिणाचिकेतः ॥" इति तट्टीकायां कुल्लूकभट्टः ॥ नारायणस्य नामविशेषः । यथा, महाभारते १२ । ३३८ । ४ ।
"पञ्चाग्ने ! त्रिणाचिकेत ! षडङ्गनिधान ! ॥")

त्रितक्षं, क्ली स्त्री, त्रयाणां तक्षाणां समाहारः । तक्षत्रयम् । इत्यमरः । ३ । ५ । ४१ ॥

त्रितयं, क्ली, (त्रयोऽवयवा अस्य । त्रि + "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् ।) त्रयम् । इति व्याकरणम् ॥ (यथा, महाभारते । १३ । १११ । १८ ।
"धर्म्मश्चार्थश्च कामश्च त्रितयं जीविते फलम् ।
एतत्त्रयमवाप्तव्यमधर्म्मपरिवर्ज्जितम् ॥"
त्रिप्राकारे, त्रि । यथा, पञ्चदश्याम् । १।४६ ।
"त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीम् ।
अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते ॥")

त्रिदण्डः, पुं, (त्रिदण्डं चतुरङ्गुलगोबालवेष्टनादन्योन्यसम्बन्धं अस्त्यस्येति । अर्श आदित्वादच् ।) सन्न्यासाश्रमः । यथा,—
"यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः ।
ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ॥"
इति श्रीभागवतम् ॥
(त्रयाणां दण्डानां समाहारः । यतित्रिदण्डे, क्ली । यथा, महाभारते । १२ । ३२० ।१५५ ।
"सप्ताङ्गस्यास्य राज्यस्य त्रिदण्डस्येव तिष्ठतः ।
अन्योन्यगुणयुक्तस्य कः केन गुणतोऽधिकः ॥"
कायवाङ्मनोदण्डत्रये । यथा, मनुः । १२।११ ।
"त्रिदण्डमेतन्निक्षिप्य सर्व्वभूतेषु मानवः ।
कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति ॥
"सत्त्वमात्मा शरीरञ्च त्रयमेतत्त्रिदण्डवत् ।
लोकास्तिष्ठति संयोगात्तत्र सर्व्वं प्रतिष्ठितम् ॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥)

त्रिदण्डी, [न्] पुं, (त्रिदण्डमस्त्यस्येति । इनिः ।) त्रिदण्डधारियतिः । (यथा, महाभारते । १२। ३२० । ८ ।
"तया जगदिदं कृत्स्नमटन्त्या मिथिलेश्वरः ।
तत्र तत्र श्रुतो मोक्षे कथ्यमानस्त्रिदण्डिभिः ॥")
कायवाङ्मनोदण्डयुक्तः । इति श्रीभागवतम् ॥ (यथा, मनुः । १२ । १० ।
"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ॥")
यज्ञोपवीतम् । इति लोकप्रसिद्धिः ॥

त्रिदला, स्त्री, (त्रीणि त्रीणि दलानि पत्राणि यस्याः ।) गोधापदी लता । इति जटाधरः ॥

त्रिदलिका, स्त्री, (त्रीणि दलानि यस्याः । कापि अत इत्वम् ।) चर्म्मकषा । इति शब्दचन्द्रिका ॥

त्रिदशः, पुं, (तृतीय यौवनाख्या दशा यस्य । त्रिशब्दस्यात्र त्रिभागवत् तृतीयार्थकता । यद्वा, तिस्रो जन्मसत्ताविनाशाख्याः न तु मनुष्याणामिव